International Journal of Sanskrit Research 2015; 1(4): 108-109

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2015; 1(4): 108-109
© 2015 IJSR
www.sanskritjournal.com
Received: 25-04-2015
Accepted: 28-05-2015

डा. यस् वि बि के वि गुप्ता
पी एच् .डी - पाण्डिच्चेरी विश्वविद्यालयः

Correspondence
डा. यस् वि बि के वि गुप्ता
पी एच् .डी - पाण्डिच्चेरी विश्वविद्यालयः

# संस्कृतकाव्यानां विकासः

*डा. यस् वि बि के वि गुप्ता*

संस्कृतकाव्यानाम् उत्पत्तेः बीजं श्वेदेश प्राप्यते। प्राचीनकालिक परम्पराभिः ज्ञायते यत् मनुष्या उत्सवप्रिया आसन्। तथा यथा समयं ते सामूहिकगीत् नृत्यादिभिः मनोरञ्जनं कुर्वन्ति स्म। कालान्तरे एतानि गीतनृत्यादीनि आख्यानरूपेण परिणतानि अभवन् तथा विकिसितानि परिवर्धितानि च भूत्वा महाकाव्यानां रूपेण परिवर्तितानि अभवन्।

संस्कृताकाव्यानां प्रथमकिरणः सर्वप्रथमम् ऋग्वेदे दृश्यते। तस्य अनेकानि सूक्तानि अथवा मन्त्रा ईदृशाः सन्तिए ये कवेः प्रतिभायाः सुन्दरं परिचयं प्रस्तूयन्ते। अनेन प्रकारेण परवर्तिसाहित्ये ब्राह्मणग्रन्थेषु एतेरेय ब्रह्मणादिषु हरिश्चन्द्रोपाख्यानं काव्यस्तवैः परिपूरितमस्ति। महाकाव्यानां विषयपरम्परायां महर्षिपाणिनेः नामाऽपि गृह्यते येन “पातालविजयम्” तथा “जाम्बवतीविजयम्” नाम्नी महाकाव्ये लिखिते। अस्य अनेकान्युदाहरणानि सूक्तग्रन्थेषु सङ्कलितानि सन्ति। रुद्रटकृतकाव्यालङ्कारसूत्रस्य सुप्रसिद्धटीकाकारः नामिसाधु उपर्युक्तयोः द्वयोः काव्ययो उल्लेखम् अकरोत्। वररुचि नाम्नाऽपि अनेकपद्यानां सङ्कलनं विभिन्नसुभाषितसंग्रहेषु प्राप्यतेए येषु सदुक्तिकर्णामृत सुभाषितावलीशार्ङ्गधर-पद्धतीनां नामानि स्मरणीयानि सन्ति।

लौकिकसंस्कृते काव्यलेखनस्य क्रमः वाल्मीकितः प्रारब्धः। आदिकविः यदा कामातुरक्रौञ्चपक्षिभ्यामेकस्य वधम् अपश्यत्। कातरस्वरेण क्रौञ्च्याः विलापं अश्रृणोत् तदा तस्य रक्तसिक्तहृदि शोकतरङ्गिणी प्रवहिता अभवत्। अनायासेन तस्य मुखेन निः सृतम्।

> मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
> यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥

काव्येऽस्मिन् २४००० श्लोकाः तथा सप्तकाण्डाः सन्ति। तेषु बालकाण्ड उत्तरकाण्डयोः शैली अन्यकाण्डेभ्यः भिन्ना वर्तते। रामायणेन महाभारतेन समं पुराणान्यपि संस्कृतसाहित्यस्य उपजीव्यानि सन्ति। एषु पुराणेषु अष्टादशपुराणानां तथा तावदेव उपपुराणानां विशिष्टं महत्वमस्ति। वेदव्यास अस्य रचयिता अस्ति।

कविकुलचूडामणिकालिदासस्य नाम संस्कृतसाहित्याकाशे देदीप्यमान-सूर्यवत् अद्यापि विद्यमानमस्ति। अस्य समयः गुप्तकाले ईसायाः चतुर्थशताब्दी मन्यते। अस्य काव्यानि ऋतुसंहारंए मेघदूतंए कुमारसम्भवंए रघुवंशञ्चास्ति अन्तिमे द्वे महाकाव्ये स्तः एतेषां स्थानं लघुत्रय्यामपि वर्तते। रघुवंशे एकोनविंशतिसर्गाः सन्ति। अस्मिन् ग्रन्थे रघोः वंशस्य यशस्वीनां राज्ञां अनुपमकाव्यशैल्या वर्णनमस्ति। अस्य महाकाव्यस्योपजीव्यं तु रामायणं वर्तते। यत्र तत्र पुराणेषु चर्चिता अपि कथा अत्र सङ्गृहीताः सन्ति महाकविना कालिदासेन। इदं कवेः विद्वत्तायाः चमत्कृतचरमपरिणते एकम् द्वितीय मुदाहरणमस्ति। कुमारसम्भवं स्वस्य सुकुमारभाव व्यञ्जनया उदात्तकोमलकल्पनयाए प्राञ्जलपदविन्यासेन च विशिष्टमस्ति। अस्मिन् सप्तदशसर्गाः सन्तिए किन्तु एतेषु सर्गेषु कालिदासेन विरचिता अष्टसर्गा एव मन्यन्ते।

सुप्रसिद्ध कविमाघ उपमाया अर्थगौरवायए पदलालित्यस्य त्रयाणां प्रयोगे निष्णात आसीत्। निम्नलिखितेन श्लोकेन अपि इदं स्पष्टं भवति।

> उपमा कालिदासस्य भारवेर्थगौरवम्।
> दण्डिनः पदलालित्यं माघे सन्ति त्रयोगुणाः॥

माघस्य रचना शिशुपालवधम् एकं विख्यातं महाकाव्यमस्ति। एतेषां समयः ६५० – ७०० ई पर्यन्तं मन्यते।

**शिशुपालवधकाव्ये विंशतिसर्गाः १६५० श्लोकाः सन्ति। श्रीकृष्णेन कृतस्य शिशुपालवधस्य कथा काव्येऽस्मिन् वर्णिता अस्ति।**

**संस्कृते ऐतिहासिकमहाकाव्यानां परम्परायां अनेकानि महाकाव्यानि विरचितानि सन्ति। पद्मगुप्तपरिमलः "नवसाहसाङ्कचरितम्" नाम महाकाव्यं अष्टादश सर्गेषु अलिखत्। काव्येऽस्मिन् १५०० श्लोकाः सन्ति। सरस्वतीकण्ठाभरणेए काव्यप्रकाशेए औचित्यविचारचर्चायां इत्यादिषु प्रसिद्धमहत्त्वपूर्णग्रन्थेषु अस्य महाकाव्यस्य उदाहरणानि सन्ति। बिल्हणः विक्रमाङ्कदेवचिरतं नामकं महाकाव्यं वैदर्भिशैल्याम् अष्टादशसर्गेषु अलिखत्। कल्हणः "राजतरङ्गिणीम्" अलिखत्। काव्येऽस्मिन् कस्यापि विशेषराज्ञ अथवा वंशविशेषस्य गाथैव नास्ति अपि तु काश्मीरप्रदेशस्य सम्पूर्णसमाजस्य अत्यन्तविस्तृतेतिहासोऽस्ति।**

## काव्यप्रयोजनम् .

**मानवः मानवत्वेन जीवितुं साहित्यं अत्यन्तोपयोगाय भवति। समाजाय साहित्यमत्यन्तमावश्यकमिति ज्ञात्वैव राजानः संस्थानाधीशाः कवीन् पोषयन्तः साहित्यं परिरक्षितवन्तः। तादृशस्य वैशिष्ट्ययुक्तस्य साहित्यस्य प्रयोजनानि अपि सहत्वपूर्णाणि भवन्ति। आलङ्कारकैः साहित्यप्रयोजनान्यानुक्तानि। परन्तु ते काव्यप्रयोजनानि ऊचुः। कवेः कर्म एव काव्यं भवति। यद्विशिष्टकर्माचरणे तस्मै कविरितिनामागतं तस्य विशिष्टकर्मणः एव काव्यमिति व्यपदेशः। काव्यशब्दः साहित्यसहितार्थः एव भवति।**

आलङ्कारिकेषु प्राचीनालङ्कारिकः भामहः स्व काव्यालङ्कार इति अलङ्कारशास्त्रग्रन्थे काव्यप्रयोजनं एवं विवृणोत् .

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
करोति कीर्तिं प्रीतिञ्च साधुकाव्य निषेवणम्[1]॥ इति॥

धर्मार्थकाममोक्षाः इति चतुर्षु पुरुषार्थेषु विद्यमान नैपुण्यं कीर्तिः आनन्दः उत्तमकाव्यपठनेनैव भवति इति श्लोकार्थः।
भारतीय साहित्यसौधं धर्मार्थकाममोक्षाः इति चतुर्णां पुरुषार्थरूपं स्तम्भानामुपरि निर्मितम्। यत्किमपि वा काव्यं पश्यामः चेत्त्र पुरुषार्थज्ञानसमम्बद्ध विषयाः दरीदृश्यन्ते।
धर्मेचार्थेच कामेच मोक्षेच भरतर्षभ।

यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्[2]॥

धर्मार्थकाममोक्षेषु महाभारते यत् निरूपितं लोके तदेव लोके भवति। यदस्मिन् ग्रन्थे न निरूपितं तत् लोके कुत्रापि न भवतीति भावः। अतः पुरुषार्थपरिज्ञानसम्बन्धं विज्ञानम् महाभारते समृद्धतया वर्तते।
सुप्रसिद्धालङ्कारिकः मम्मटः काव्यप्रकाशे काव्यप्रयोजनानि एवं निरूपयत्।

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृत्तये कान्तासम्मिततयोऽपदेशयुजे[3]॥

कीर्तिः सम्पत् व्यवहारज्ञानं अमङ्गलक्षितः सद्यः परनिर्वृतिः कान्तासम्मिततयोपदेशञ्च काव्यप्रयोजननानि भवन्ति इति श्लोकार्थः। श्लोकार्थं सविवरणं परिशीलयामः।

### काव्यं यशसे .

युगेभ्यः कवयः काव्यानि रचयित्वा प्रधानतया यशः एव सम्पादितवन्तः। मानवचरित्रे आचन्द्रतारार्काकीर्तियोग्यः लब्धमिति चेत् महाकविभ्यः इत्ययं विषयं न सत्यदूरं काव्यद्वारा कवीनां पठितॄणां काव्यभर्तॄणाञ्च कीर्तिः लभ्यते।

### काव्यं अर्थकृत् .

काव्यं धनार्जनाय सहकरोति। सत्काव्यम् अर्थदायकं ऐश्वर्यप्रापकञ्च भवति। काव्यानि विरच्य कवयः राजभ्यः धनधन्यादयः प्राप्नुवन्ति। अतः सत्काव्यं ऐश्वर्यप्रदम् इति वचनं समुचितमेव भवति।

### काव्यं व्यवहारवित् .

मम्मटः काव्यं व्यवहारज्ञानं जनयतीत्यसूचयत्। कवयः लोकज्ञाः सर्वज्ञाः भवन्ति इति कृत्वा तेषां काव्येषु विभिन्न सन्निवेशान् चित्रीकृत्य लोकस्य रीतिं विशदयति। प्रभुणा सेवकेन पण्डितेन पामरेण अहङ्कारिणा च साकं कथं व्यवहर्तव्यम् इत्ययं विषयः काव्यमुपदिशति।

### शिवेतरक्षतये .

सत्काव्यरचनया अमङ्गलनाशः भवति। रामायणभारत-भागवतादिग्रन्थानां पारायणेन नैकक्लेशाः दूरीभवन्तीति अधुनापि प्रजाः विश्वसन्ति। धावकनामकविः सूर्यशतकं निर्माय स्वकुष्टरोगं दूरीकृतवानित्यपि ज्ञायते। अतः सत्काव्यरचनया केवल पठनेन पठितुः अपि अमङ्गलनाशः भवतीति वक्तुं शक्यते।

### सद्यः परनिर्वृतिः .

एतत् प्रयोजनं तु अधिकतया पठितुः सम्बद्धम् इति वक्तुं शक्यते। काव्यस्य रसास्वादनेन आनन्दो जायते। काव्यपठनेन सहृदयः पाठकः अलौकिकं आनन्दं अनुभवति। अर्थात् काव्ये विविधसन्निवेशद्वारा व्यज्यमान रसं आस्वादयन् ब्रह्मानन्दतुल्यं आनन्दमनुभवति। काव्यप्रयोजनेषु इदं प्रमुखं भवति।

### कान्तासम्मिततया उपदेशयुजे .

मम्मटः अन्तिमं प्रयोजनं एवं उक्तवान्। कान्तासम्मिततया लोकाय उपदेशः करणीयं। उत्तमकाव्यं समाजाय धर्मं कान्ता इव उपदिशतीति भावः। कान्ता अथवा नायिका स्वमनोभाव प्रकटनद्वारा नायकाय उच्यमानं विषयं चमत्कारेण व्यङ्ग्येन उपदिशति। इदमेव कान्तासम्मितम् इत्युच्यते।
वेदाः धर्मं प्रभुशासनमिव उपदिशति पुराणानि मित्रवत् उपदिशन्ति। काव्यानि कान्ता सम्मिततया च पाठकाय उपदिशन्ति। कर्तव्य उपदेशेषु वेदाः प्रभुवत् धर्मं चर सत्यं वद इति शासन्ति। पुराणानि मित्रवत् उदाहरणैः कथाद्वारा च प्रबोधयन्ति। काव्यानि मनोहरी प्रेयसी इव अत्यन्तसुकुमारतया कर्तव्योन्मुखतां जनयन्ति।
काव्ये नीतिबोधः अनावश्यकम्। काव्यं काव्यार्थमेव इति कश्चन वादः श्रूयते। काव्ये धर्मोपदेशः व्यङ्ग्यमुखेनैव करणीयमिति आलङ्कारिकाः असूचयन्।
एवं काव्यप्रयोजनान्यनेकविधतया निरूपितानि। तेषु प्रयोजनद्वयं प्रधानं भवति। १० रसानुभूतिः २० धर्मोपदेशश्च। अनयोर्मध्ये आनन्दानुभूतिः अत्यन्तं प्रधानं भवति। एवं कवयः स्वरचनाद्वारा समाजः समीचीनमार्गे चालयितव्यं इति विषये पाश्चात्याः अपि अङ्गीकुर्वन्ति। अतः साहित्यं मानवे विद्यमान सङ्कुचितत्वं पाशविकप्रवृत्तिं च अपहाय मानवस्य जीवनस्य सार्थकतां कल्पयति।

### उपयुक्तानां ग्रन्थानां सूची


1. काव्यप्रकाशःए मम्मटःए राजस्थान प्रच्यविद्या प्रतिष्ठान, राजस्थान, 1959
2. कुमारसम्भवम्ए कालिदासःए चौखाम्बासंस्कृतसम्स्थान्ए वाराणसीए 1987
3. जानकीहरणम्, कुमारदासु, ओरीयण्टल् पब्लिषिंङ्ग् को., बाम्बे, 1908
4. दशरूपकम्, धनन्जयः, निर्णय-सागर प्रेस्, मुंबई, 1917
5. निरुक्तम् ए यास्कःए केन्द्रीयपुस्तकविभागःएमुम्बय्यिए 1918
6. महाभारतम् ए व्यासःए वाविल्लरांशास्त्रि सन्स्ए चेन्नैए 1935
7. रघुवंशःए कालिदासःए चौखाम्बा विद्याभवन्ए वाराणसीए 1955
8. साहित्यदर्पणःए विश्वनाथःए भारतीयविद्याप्रकाशन्ए दिल्लीए 1978
9. संस्कृतसाहित्येतिहासःए सीतारामचतुर्वेदीए चौखाम्बा विद्याभवन्ए वाराणसीए 1967


## सन्दर्भः


1. **भामहः- काव्यलंकारः – 1.2**
2. **महाभारतम् – आदिपर्व**
3. **काव्यप्रकाशः 1.2**